# Gaekwad's Oriental Series

No. IV

# PÂRTHAPARÂKRAMA

CENTRAL LIBRARY, BARODA.

P.P. Ac. Gunratnasuri M.S.

Jin Gun Aaradhak Trust

## *GAEKWAD'S ORIENTAL SERIES*

Edited under the supervision of the Curator of State Libraries, Baroda.

NO. IV.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

परमारश्रीप्रह्लादनदेवविरचितः

# पार्थपराक्रमव्यायोगः

# PÂRTHAPARÂKRAMA VYÂYOGA

OF

PARAMÂRA PRAHLÂDANADEVA

EDITED WITH INTRODUCTION AND APPENDICES

BY

CHIMANLAL D. DALAL, M. A.

---

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJA GAEKWAD OF BARODA.

CENTRAL LIBRARY

BARODA.

1917.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Published by Janardan Sakharam Kudalkar, M. A., LL. B., Curator of State Libraries, Baroda, for the Baroda Government, and Printed by Manilal Itcharam Desai, at
**The Gujarati Printing Press, No. 8, Sassoon Buildings, Circle, Fort, Bombay.**

*Price* [illegible]

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# INTRODUCTION

देवी सरोजासनसम्भवा किं कामप्रदा वा सुरसौरभेयी ।
प्रह्लादनाकारधरा धरायामायातवत्येष न निश्चयो मे ॥

Mt. Âbu Lûṇiga Vasati Praśasti 39.

The present work has been included in the "Gaekwad's Oriental Series" mainly as a production of a royal prince of mædieval Gujarât. It is true that the State of Chandrâvatî was regarded even at that time as a State of Marwar,[1] yet the rulers of Chandrâvatî were feudatories (महामण्डलेश्वर) of the kings of Gujarat, and even led the Gurjar armies in battlefields. It may be, moreover, noted that the author of the present work has greater claims to be called a Prince of Gujarat in as much as he founded the city of Palanpur.

**The dramatic literature of Gujarat.** The whole of Sanskṛita dramatic literature of India consists of about 600 works. Gujarat's contribution in this is, however, very small. The following list of Sanskṛita dramas of Gujarat hitherto-known will not be without interest.

Bilhaṇa
1 Karṇasundarî.*

Râmachandra¶
2 Raghuvilâsa†
3 Nalavilâsa‡
4 Yaduvîlâsa§
5 Kaumudîmitrânanda||
6 Nirbhayabhîma-vyâyoga*
7 Satyahariśchandra*
8 Vanamâlikânâtikâ§
9 Mallikâmakaranda§

Devachandra [Nâtikâ.†
10 Chandralekhâvikrîdana
11 Mânamudrâbhañjana.§

Yaśaśchandra
12 Mudritakumadachandra*
13 Râjîmatîprabodha‡

Râmabhadra
14 Prabuddharauhiṇeya||

Subhaṭa
15 Dûtâṅgada*

Prahlâdana
16 Pârthaparâkrama

Someśvara
17 Ullâgharâghava‡

Narendraprabha
18 Kâkusthakeli§

Bâlachandra
19 Karuṇâvajrâyudha*

Vijayapâla
20 Draupadî-svayamvara||

Yaśaḥpâla
21 Mohaparâjaya||

Meghaprabha
22 Dharmâbhyudaya Chhâyâ Nâṭaka‡

Vyâsa Mokshâditya[2]
23 Bhîmaparâkrama†

Gaṅgâdhara
24 Gaṅgâdâsapratâpavilâsa†

Ravidâsa
25 Mithyâjñânakhaṇḍana.†

---

* Printed. † In Ms. form. ‡ To be printed. § To be discovered. || In press.

¶ About Râmachandra's प्रबन्धशत the following note is found in an old paper leaf containing notes on mss. रामचन्द्रकृतं प्रबन्धशतं द्वादशरूपकनाटकादिस्वरूपज्ञापकं ५०००.

Hammîramadamardana Act I.

*cf.* (1) श्रीसोमसिंहोदयसिंहधारावर्षैरमीभिर्मरुदेशनाथैः ।
दिशोऽष्ट जेतुं स्फुटमष्टबाहुस्त्रिभिः समेतैरभवत्प्रभुर्नः ॥

(2) Mokshâditya mentioned in the Praśasti (Samvat 1320) of Mahâkâleśvara, Por-

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**Dhârâvarsha and Prahlâdana.** Dhârâvarsha, son of Yaśodhavala and ruler of Chandrâvatî was the elder brother of our author who was his Yuvarâja. Dhârâvarsha's reign was very illustrious in the history of the Parmars of Mt. Âbu. He fought with the army of Kumârapâla in the invasion of Mallikârjuna of Konkana. The present work describes him as having amazed the whole of India with his valour and extolling his skill in archery,[3] refers to his repelling the nocturnal attack of the King of Jângalas.[4] The ms. C identifies this prince with Pṛithvîrâja. The Śambhar King Pṛithvîrâja was reigning up to Samvat 1236. This most probably may have taken place at the time of the invasion of King Ajayapâla of the Jâṅgala King.[5] Dhârâvarsha's reign was very long. The oldest inscription of his reign yet discovered is dated Samvat 1220. He was living at the time of the laying of the foundation of the Lûṇigavasti on Mt. Âbu, and this event occurred in Samvat 1286. He also helped Vastupâla in repulsing an attack of an army from Delhi about the same time. Prahlâdana was not fortunate enough to become a king, as he did not outlive his elder brother. From the inscriptions given in Appendix II, it is clear that he was already working as Yuvarâja in Samvat 1220 and was living up to Samvat 1265.

**The form of the play.** The Pârthaparâkrama is a Vyâyoga (Military Spectacle). Its main characteristics are that it consists of a single act, the plot is well known and the sentiments are the excited ones. It represents a combat not occasioned by a woman. There are very few female characters

---

bunder State is different from this. He is the father of Harihara (मोक्षार्कधीमतः सूनुश्चक्रे हरिहरः कविः) while our author is a pupil of Harihara and son of Bhîma.

*cf.* कविनिवहधुरन्धरस्य हरिहरस्यान्तेवासिना भीमतनयेन मोक्षादित्येन विरचितो भीमविक्रमनामा व्यायोगोऽभिनीयताम् । also कृतिरियं व्यासश्रीमोक्षादित्यस्य ।

शराष्टरामशीतांशौ (१३८५) विक्रमादित्यवत्सरे ।
मोक्षादित्येन विदुषा व्यायोगोऽयं विनिर्मितः ॥

(3) तदेतदतुलपराक्रमचमत्कारिताखिलभारतस्य श्रीधारावर्षस्य ।

(4) किमङ्ग ! जाङ्गलपतेः सौतिकप्रस्तावोपश्लोकमनाकर्णितवान् भवान् ? ।
यस्याद्यापि यशः शिलीमुखमुखोत्कीर्णैः प्रशस्त्यक्षरैः
स्वःस्त्रीणां दिवि नायकसभास्तम्भेन संस्मार्यते ।
सेहे सोऽपि न सौतिकं विनिपतद्द्रौणेस्तदत्यर्जुनं
धारावर्ष ! तवाद्य पौरुषमभूत्तीर्णोपमानं भुवि ॥ पार्थपराक्रम.

(5) दण्डे दण्डपिका हैमी सह मत्तैर्मतङ्गजैः ।
दत्त्वा पादं गले येन जाङ्गलेशादगृह्यत ॥ Kirtikaumudî II. 53.

(6) Vide Jinaharsha's Vastupâlacharitra VII 44-63.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

and the hero is neither a divine being nor a king.[7] The play was acted at the order of the court of Dhârâvarsha on the occasion of the festival of investing Achaleśwara, the tutelary god of the Parmars of Mt. Âbu, with the sacred thread.[8] Other dramas of its type are as under:—

Dhanañjayavijaya of Kâñchanâchârya.
Nirbhayabhîma of Râmachandra.
Bhîmaparâkrama of Mokshâditya.
Kirâtârjunîya of Vatsarâja.
Jâmadagnyajaya.
Narakâsuravijaya of Dharmapaṇḍita.
Prachaṇḍabhairava of Sadâśiva.
Prachaṇḍagaruda.
Saugandhikâharaṇa of Viśvanâtha.
Vinatânandana of Govinda.

The subject-matter of the present drama is taken from the Gograhaṇa Parva of the Virâta Parva, Mahâbhârata. The plot centres round Arjuna whose exploits of defeating the army of the Kauravas and recovering the cows of the Virâta king form the subject of the drama.

**The author as a man of letters.** Prahlâdanadeva seems to have been a poet of note. Someśvara represents him in the Mt. Âbu Praśasti as an incarnation of Sarasvatî, while in his Kîrtikaumudî he says that he became famous as her son. In another verse in the same work, he says that Prahlâdana made the Goddess of Learning, who was afflicted with sorrow on account of the death of Muñja and Bhoja, again delightful by dramatizing a beautiful

---

(7) एकाहचरितैकाङ्को गर्भामर्शविवर्जितः ॥ ७२ ॥
अस्त्रीनिमित्तसङ्ग्रामो निर्युद्धस्पधनोद्धतः ।
स्वल्पयोषिज्जनः ख्यातवस्तुर्दीप्तरसाश्रयः ॥ ७३ ॥
अदिव्योऽभूपतिः स्वामी व्यायोगो नायकां विना । नाट्यदर्पण.

(8) The following description of the sacred thread of the phallus is given from the Kâlikâ Purâṇa

एकादशाऽथवा सूत्रैस्त्रिंशता वाऽष्टयुक्तया ।
पञ्चाशता वा कर्तव्यं तुल्यग्रन्थ्यन्तरालकम् ॥
लिङ्गविस्तारमानानि चतुरङ्गुष्ठिकानि वा ।
तथैव पिण्डिकास्पर्शे चतुर्थं सार्वदैवतम् ॥
साङ्गावतारकं कार्यं पवित्रमतिसुन्दरम् ।
आषाढशुक्लपक्षस्य याऽष्टमी श्रावणस्य च ।
पवित्रारोहणं कुर्याद्देवप्रीतिकरं परम् ॥

Nandivardhana is another name of Mt. Âbu which is represented as son of the Himalayas.

*cf.* नन्दीवर्धन इत्यासीत् प्राक् शैलोऽयं हिमाद्रिजः ।
कालेनाऽर्बुदनागाधिष्ठानात्त्वर्बुद इत्यभूत् ॥ तीर्थकल्प–अर्बुदकल्प.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

story[9]. The Sûktimuktâvalî of Jahlaṇa and the Śarṅgadharapaddhati quote some verses of Prahlâdana and Prahlâda. They will be found collected in Appendix II. Prahlâdana's poetry is described as possessing the qualities of समता, समाधि, प्रसाद.[10] In the Mt. Âbu Praśasti, it is said that Somasiṃhadeva, son and successor of Dhârâvarsha received training at the hands of his uncle Prahlâdana.[11] In the Praśasti of the Kotîśvara Temple, he is called the support of the six Darśanas, expert in all arts and the best among Kumaras (Yuvarâjas).[12]

**Prahladana as a warrior.** Our author was not only a poet but a great warrior. He is described by Someśvara as having become famous as the lord of the Goddess of Victory.[13] He also tells us that King Ajayapâla of Gujarat was wounded in a battle with Sâmantasiṃha, King of Mewar.[14] Prahlâdana fought with him in this battle and his sword protected Ajayapâla who had become nervous on account of wounds.[15]

**Prahlâdana as a philanthropist.** Someśvara praises him for his liberality. In the Surathotsava, he says in one place, that the vow of doing good to others ended with the death of Prahlâdana;[16] while in the Mt. Âbu

---

(9) श्रीप्रह्लादनदेवोऽभूद्धितयेन प्रसिद्धिमान् ।
पुत्रत्वेन सरस्वत्याः पतित्वेन जयश्रियः ॥ १४ ॥
श्रीभोजमुञ्जादुःखार्ता रम्यां वर्तयता कथाम् ।
प्रह्लादनेन साह्लादा पुनश्चक्रे सरस्वती ॥ १५ ॥ Kîrtikaumudî I-14-15

The printed text reads दुःखार्त्ता incorrectly. The present reading is from a ms. dated Samvat 1507. The meaning of the phrase रम्यां वर्तयता कथाम् is not quite clear. It may mean that Prahlâdana composed some beautiful prose-romance. But now there is no trace even of its name.

(10) *cf* सन्दर्भः सुकवेः समाधिसमतागर्भः कुमारस्य च । प्रह्लादनस्य कविता वसतिः प्रसत्तेः । पार्थपराक्रम.

(11) धारावर्षसुतोयं जयति श्रीसोमसिंहदेवो यः ।
पितृतः शौर्यं विद्यां पितृव्यतो ज्ञानमुभयतो जगृहे ॥ ३९ ॥

(12) षड्दर्शनावलम्बनस्तम्भश्रीसकलकलाकोविदकुमारगुरुश्रीप्रह्लादनदेवयौवराज्ये ।

(13) पतित्वेन जयश्रियः

(14) यः शौचसंयमपटुः कटुकेश्वराख्यमाराध्य भूधरसुताघटितार्धदेहम् ।
तां दारुणामपि रणाङ्गणजातघातव्रातव्यथामजयपालनृपादपास्थात् ॥
Surathotsava XV-32.

(15) सामन्तसिंहसमितिक्षतिविक्षतौजःश्रीगूर्जरक्षितिपरक्षणदक्षिणासिः ।
प्रह्लादनस्तदनुजो दनुजोत्तमारिचारित्रमत्र पुनरुज्ज्वलयाञ्चकार ॥
Mt. Âbu Lûṇigavasati Praśasti 38.

(16) श्रीप्रह्लादनमन्तरेण विरतं विश्वोपकारव्रतम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Praśasti of the Lûṇiga Vasati, he represents him as an incarnation of the heavenly cow.[17]

**Prahlâdana the founder of Palanpur.** The legend quoted in Appendix III from Upadeśa Taranginî would show that our author founded after his name the city of Prahlâdanapura. This city is the same as Palanpur, the capital of the State of that name in Gujarat, 54 miles to the south of Mt. Âbu. The State is at present ruled by a Mahomedan Chief who pays to H. H. the Maharaja Gaekwar a tribute of about Rs. 38,000. Here he built a big Jaina temple called Pâlhavihâra. References to the grandeur of the city and the Vihâra are found in works of the 13th to 17th centuries.[18] The legend relates that this prince became a leper through the sin of melting a Jaina metal image and making a bull of it for the Achaleśvara Temple. In order to avert this sin and be cured of leprosy, he resorted to Śîladhavala Âchârya and at his advice built the Pâlhavihâra.

---

(17) देवी सरोजासनसम्भवा किं कामप्रदा किं सुरसौरभेयी।
प्रह्लादनाकारधरा धरायामायातवत्येष न निश्चयो मे ॥

(18) (a) श्रीमत्प्रह्लादनपुरवरे पूर्णभद्रो गणिर्द्राक्
शिष्यः श्रीमज्जिनपतिगुरोश्चारु चक्रे चरित्रम्।
चित्ताश्चर्यं विजयतनयस्यातिमुक्तस्य साधो-
र्द्व्यष्टार्काब्दे १२८२ दिति सुरगुरौ कार्त्तिके पूर्णमास्याम् ॥

(Praśasti of the Atimuktacharitra of Pûrṇabhadra composed in Samvat 1282).

(b) Vastupâla on his way to Mt. Âbu visited this place, paid his respects to the image of Pârsvanatha in the Pâlhavihâra and installed an image of Neminâtha in a niche on the left side.

cf. प्रभुं प्रह्लादनागारं प्राप्य प्रह्लादने पुरे।
प्रह्लादी परया भक्त्या श्रीवामेयं ननाम सः ॥ ४० ॥
हैमकुम्भत्रयं तत्र निवेश्य जिनवेश्मनि।
अतिष्टिपद्बृहद्बिम्बं श्रीनेमेर्वामखत्तके ॥ ४१ ॥
उद्दधार पुनर्मन्त्री तद्बलानकमण्डपे।
पूगीफलापणश्रेणीदायं पूजार्थमार्पयत् ॥ ४२ ॥

(c) Samarâ Râsu a work composed about Samvat 1371 describes Palanpura and Pâlhavihâra as under:—

पालहणपुरु सुप्रसीधु पुन्नवंतलोयह निलउ।
सोहइ पाल्हविहारु पासभुवणु तहिं पुरतिलउ ॥ १० ॥
भास हाट चउहटा रूयडा गढमंदिरह निवेसु त।
वाविकूवआरामघण घरपुरसरसपएस त ॥ ११ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**The mss. material.** The Pattan Bhaṇdars contain two mss.:—(1) in the Bhaṇdâra of the Limbdi's Pâdâ (2) in the Bhaṇdâra of the Vâdi Pârśvanâtha's temple. The first is dated Samvat 1426 and consists of 12 leaves.[19] The colophon runs as under:—

श्रीविक्रमादृतुविलोचनवेदचन्द्र ( १४२६ )—
वर्षे नभस्यविशदे प्रतिपद्दिने च ।
व्यायोगमेनमिति पार्थपराक्रमाख्यं
सन्नाटकं लिखितवान् जिनदेवसूरिः ॥

The present edition is based on a transcript of the second of these mss. This is fairly correct and is designated here as A. The ms. B is a transcript of an old ms. sent by Mr. T. M. Tripathi, B.A. of Bombay. The ms. of the Limbdi's Pâdâ was acquired as a loan after the text was printed off. The readings of this ms. will be found on page 7. This ms. is designated as C.

---

(d) Somasaubhâgya a work of the last quarter of the 15th century describes as follows:—

प्रह्लादनक्षितिपतिर्द्युपतिर्महोभिः श्रीअर्बुदाचलविभुः स बभूव पूर्वम् ।
तेन स्वनामविदितं दितपापतापं संस्थापितं पुरमिदं मुदितप्रजाढ्यम् ॥ १३ ॥
तत्रैष भूमिरमणीरमणीयहारं स्फारं विहारमसमं समकारयच्च ।
स्वीयाख्यया प्रवरकैपिशीर्षसारप्राकारगोपुरमहर्द्धिपरार्धशोभम् ॥ १४ ॥
सम्यग्दृशां विरचिताद्भुतचित्तशैत्ये चैत्ये फणामणिनिरस्ततमःसमूहम् ।
विघ्नोपशान्तिकरणं शरणं श्रितानां श्रीपार्श्वबिम्बमविलम्बमतिष्टिपच्च ॥ १५ ॥

(e) The Hîrasaubhâgya gives a more vivid and rich picture of the city and the temple the first canto verses 69–128. The following verse relates to the founding of this city by Prahlâdana.

यदीयमूर्तिर्निरमापि भक्त्या प्रह्लादनाम्ना पुरि राणकेन ।
तस्याजयस्येव नृपस्य पार्श्वोऽप्यामापहः स्नानजलेन जज्ञे ॥ ७६ ॥

( टीका ) प्रह्लादनाम्ना राणकेन पुरि स्वनगरे भक्त्या सेवासक्त्या अर्बुदशैलाचलदुर्गशिखरस्य चतुर्वदनप्रासादमध्यगतैकपित्तलमयप्रतिमागालनादुत्पन्नकुष्ठादिमहामयेन निजरोगापगमनचिकित्साप्रश्नादनु नवीनश्रीपार्श्वनाथप्रतिमाप्रासादनिर्मापणात्तवाङ्गात्समग्ररोगाः शान्तिं यास्यन्तीति सातिशयज्ञानवत्साधुवचसा यदीया श्रीप्रह्लादनपार्श्वनाथसम्बन्धिनी मूर्त्तिः प्रतिमा निरमापि कारिता । अपि पुनः स पार्श्वनाथस्तस्य प्रह्लादनराणकस्य स्नानजलेन आमान् रोगान् कुष्ठादीनपहन्तीति आमापहस्तादृशो जज्ञे जातः ।

19. The Deccan College Mss. Library has got a tracing of this ms.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## VARIOUS READINGS OF THE MS. C.

P. 1. l. 5. C. परिभूय

P. 2. l. 10. C reads दीप्तरसतरङ्गितो and explains दीप्तरस as रणरस

P. 3. l. 1. C explains जाङ्गलपतेः as पृथिवीराजनामधेयस्य

P. 4. l. 4. C adds चिन्तयति

P. 4. l. 23. C कल्पान्ते भ्रान्तपाथोधर इति पूर्वोक्तं

P. 5. l. 27. C वचनघनविस्फूर्जितम्

P. 6. l. 12. C संवलिय

P. 6. l. 13. C reads सिल्लरिच्छा and explains सिल्ल as लहरी.

P. 6. l. 17. C निव्वावइस्सदि

P. 8. l. 15. C सुदुःश्रवः शर्कराणाम०

P. 9. l. 23. C रोचिरञ्चित०

P. 10. l. 13. C गजचरित्रा०

P. 11. l. 4. C explains इष्वासना as धनुर्विद्या०

P. 12. l. 14. read सहाया

P. 14. l. 18. C समुद्रावरणोन्मुद्रितानि

P. 16. l. 6. C adds प्रतिभयाऽऽरम्भवता after संरम्भवता

P. 19. l. 5. C तुल्यं

P. 21. l. 14. C explains प्रासङ्गिकपपरं as राजचक्रं प्रस्तावायातं

P. 21. l. 22. C reads रंजियव्व.

P. 21. l. 26. read विकटतडित्समूहदुःप्रेक्ष्य०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## पात्राणि ॥

| | |
|---|---|
| अर्जुनः ... ... ... ... ... | व्यायोगस्य नेता; पाण्डुपुत्रः |
| उत्तरा ... ... ... ... ... | विराटराजपुत्री |
| द्रौपदी ... ... ... ... ... | पाण्डवपत्नी |
| उत्तरनामा कुमारः ... ... ... ... | विराटराजपुत्रः |
| गोपाध्यक्षः or कलिञ्जकः ... ... ... ... | विराटराजगोपाध्यक्षः |
| पुरुषः जयसेनः ... ... ... ... | उत्तरकुमारपरिचारकौ |
| दिव्यपुरुषः... ... ... ... ... | स्वर्गादर्जुनस्य दिव्यरथाद्यानेता |
| द्रोणः ... ... ... ... ... | कौरवपाण्डवानां धनुर्विद्याध्यापकः |
| भीष्मः ... ... ... ... ... | कौरवपाण्डवानां पितामहः |
| सुषेणः ... ... ... ... ... | अश्वत्थामसारथिः |
| युधिष्ठिरः ... ... ... ... ... | पाण्डोर्ज्येष्ठापत्यम् |
| दुर्योधनः ... ... ... ... ... | धृतराष्ट्रपुत्रः |
| सूतः ... ... ... ... ... | दुर्योधनसारथिः |
| वासवः ... ... ... ... ... | इन्द्रः |

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

परमारश्रीप्रह्लादनदेवविरचितः

# पार्थपराक्रमव्यायोगः

देवः स वः शिवशतानि तनोतु शौरि-
र्यः शैशवेऽपि तुलयन्नतुलं नगेन्द्रम् ।
लज्जां विजित्य परिहृत्य भियं गुरूणां
गोपीजनैः सरभसं परिरभ्यते स्म ॥ १ ॥

( नान्द्यन्ते )

स्थापकः—( पुरो विलोक्य ) अहह ! सकलजन्तुजातजीवातुना जीमूतावतारसमयेन समुच्चीयत इवास्य चारिमा हिमाचलनन्दनस्य नन्दिवर्द्धनपर्वतस्य ।

तथाहि—

नीले मौलिप्रणयिनि घने वल्गुवल्गद्बलाके
बिभ्रत्युच्चैर्विकचकुसुमोद्भासिधम्मिल्लशोभाम् ।
पाताघातक्षतरयपयःसीकरोद्गारहार-
स्फारस्फातिर्वितरति रतिं कस्य नाऽसौ नगेन्द्रः ॥ २ ॥

अपि च—

दानोद्दण्डगजेन्द्रगण्डरुचिभिः पाथोमुचां मण्डलै-
र्व्योमाक्रम्यत शक्रकार्मुकमहःकिर्मीरितैः सर्वतः ।
किञ्चैते मरुतो रतोन्मुखशिखिश्रेणीशिखण्डस्खल-
त्सञ्चाराः प्रसरन्ति रन्तुमनसामुत्साहकाः पूर्वतः ॥ ३ ॥

तन्न जाने भगवतः श्रीमदचलेश्वरदेवस्य पवित्रकारोपणपर्वणि केनापि रूपकेणाद्य प्रमोदनीयाः सभासदः । ( इति चिन्तां नाटयति )

---

१ B परिभूय २ B दण्ड०

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( प्रविश्य पटाक्षेपेण )

नटः—आर्य ! तदेतदतुलपराक्रमचमत्कारिताखिलभारतस्य श्रीधारावर्षस्य पर्षदा प्रहितं पत्रकम् । तन्निरूपयतु भवान् ।

सूत्रधारः—( गृहीत्वा वाचयति )

यत्र क्षत्रनिकारकारणरणप्रेमा कुमारः प्रभुः
सन्दर्भः सुकवेः समाधिसमतागर्भः कुमारस्य च ।
तत्रास्माकमकुण्ठिताद्भुतरसस्रोतःप्लुते रूपके
चेतः कौतुकलोलुपं सपदि तत्सम्पाद्यतामुद्यमः ॥ ४ ॥

एतेन व्यायोगप्रयोगनियोगः सामाजिकानामिति वितर्कयामि । स हि दीप्तरसावरङ्गितो[1] राजव्यतिरिक्तनायकोपेतश्च ।

नटः—( स्मृत्वा ) भाव ! अस्त्येव युवराजश्रीप्रह्लादननिर्मितः पार्थपराक्रमनामा व्यायोगः ।

सूत्र०—( सानन्दम् ) अहो ! प्राचीनपुण्यसम्पदां सम्प्रदायः ।

तथाहि—

प्रह्लादनस्य कविता वसतिः प्रसत्तेः
सन्तोषकारि चरितं कपिकेतनस्य ।
निर्मत्सरा च परिषत्पटुरस्मि नाट्ये
तत्सर्वथा फलितमद्य मनोरथैर्नः ॥ ५ ॥

अपि च—

तद्भारतमभिवन्दे यशःशरीरं पराशरात्मभुवः ।
क्षेत्रज्ञो यत्र हरिः करणानि च पञ्च पाण्डुसुताः ॥ ६ ॥

नटः—( सचमत्कारम् ) भाव! धारावर्षधनञ्जययोः साधारणरणकर्मणोः किमप्यन्तरं निर्द्धारयसि ? ।

सूत्र०—अस्त्येव ।

तथाहि—

पर्षन्नेतुर्नाट्यनेतुश्च चापव्यापारेऽस्मिन्सम्मितेऽप्येष भेदः ।
एकस्यासीद्दत्तकर्णप्रमोदा कीर्त्तिः कर्णोन्माथिनी चापरस्य ॥ ७ ॥

---

१ B रसतरङ्गितो

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किमङ्ग ! जाङ्गलपतेः सौप्तिकप्रस्तावोपश्लोकमनाकर्णितवान्[1] भवान् ।

यस्याद्यापि यशः शिलीमुखमुखोत्कीर्णप्रशस्त्यक्षरैः
स्वःस्त्रीणां दिवि नाकनायकसभास्तम्भेन संस्मार्यते ।
सेहे सोऽपि न सौप्तिकं विनिपतद्द्रौणेस्तदत्यर्जुनं
धारावर्ष ! तवाद्य पौरुषमभूत्तीर्णोपमानं भुवि ॥ ८ ॥

नटः—( सचिन्तम् ) बहवस्ते दायादाः सम्भूयापकर्तुं प्रयतन्ते । तत्कथमसहायो भवानेतानभिभूय भरतकुलकीर्त्तिपताकामधिगमिष्यति ।

सूत्र०—( साहङ्कारम् ) आः ! किमिदमौचित्यविरहितं व्याहरसि । यतः—

गोत्रिणस्तृणवत्सर्वानेकोऽपि न्यक्करोम्यहम् ।
असौ बृहन्नटाकारः कुरूनिव कपिध्वजः ॥ ९ ॥

( इति निष्क्रान्तौ )

## प्रस्तावना

( ततः प्रविशति यथानिर्दिष्टोऽर्जुनः )

अर्जुनः—( आत्मानमवलोक्य सनिःश्वासम् ) अहो ! समुचितः खल्वेष विधिरस्माकम् ।

यतः—

पाञ्चालीचिकुराम्बरापनयनं दृष्ट्वैवमेव स्थिताः
सम्भूता अपि भूभुजामभिजने कर्माणि कुर्मोऽन्यतः ।
तामद्याप्यरिमन्दिरे कृतपदां लक्ष्मीमुपेक्षामहे
तत्पुंस्त्वं परिहृत्य हन्त चरतां युक्तैव नः क्लीवता ॥ १० ॥

( पुनराकाशे )

देव सुकृतसूनो ! किमद्यापि सैव तितिक्षा प्रत्यक्षापराधेषु धृतराष्ट्रनन्दनेषु । नन्ववधत्तां भवान् ।

मिथ्यारब्धदुरोदरैः किमु परैरात्ता विभूतिर्न ते
किं वा यावकपस्त्यपावकमुखे न त्वं हताशैर्हुतः ।

---

१ B न समाकर्णितवान्

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

खिन्नः किं न भवान्दवाग्निविषमे भ्राम्यन्मुहुः कानने
येनोच्चैरपि धाम वामनमिदं क्षात्रं करोषि क्षमी ॥ ११ ॥

( नेपथ्ये कलकलः )

अर्जुनः—( ससम्भ्रममाकर्ण्य )

कल्पान्तभ्रान्तपाथोधरनिकररवप्रार्थ्यमानप्रतानः
स्वानः को नाम कामं ज्वरयति जगतोऽप्येष कर्णानुदीर्णः ।

( ऊर्ध्वमवलोक्य )

केऽमी कामारिकण्ठस्थलबहुलमहोमांसलाः पांशुदण्डा-
श्चण्डांशोरंशुदण्डप्रसरमिव तिरस्कर्तुकामाः क्रमन्ते ॥ १२ ॥

( पुनः सौत्सुक्यम् ) अथवा त्रिगर्ताधिपतिं सुशर्माणं प्रति गोधनप्रत्याहरणाय प्रस्थिते सपरिच्छदेऽपि विराटपार्थिवे प्रत्यनीकसमागमलमिति सम्भाव्यते । तदेकाकिनः कुमारभूमिञ्जयस्य समीपभूमिं गच्छामि ( इति तथा कुर्वन्नग्रतो विलोक्य ) कथमयं कुमारो नर्तनागारस्थितां स्वसारमुत्तरां सैरन्ध्र्या संयम्यमानकेशपाशां दिदृक्षते ।

( ततः प्रविशति कुमारः यथानिर्दिष्टा उत्तरा सैरन्ध्रीरूपा द्रौपदी च )

उत्तरा—( करेण केशपाशं स्पृशन्ती सहर्षम् ) अम्ब[1] सेरंधिए ! सुसंजमिदो तए एस केसपासो ।

द्रौपदी—( सखेदमात्मगतम् ) णं[2] खु तुमंपि जन्नसेणी जीए अज्जवि न संजमीयदि ।

अर्जुनः—( उपसृत्य ) जयतु जयतु उत्तरा ।

उत्तरनामा कुमारः—( दृष्ट्वा ) बृहन्नट ! कुतः संरब्धचित्तवृत्तिरिवावलोक्यसे ।

अर्जुनः—( उत्तरतो दर्शयन् ) किं न शृणोषि ? ।( पूर्वोक्तं कल्पान्तेत्यादि पठति )

( प्रविश्य प्रहारबाधां निरूपयन्कान्दिशीको गोपाध्यक्षः )

गोपाध्यक्षः—कुमार ! कुमार ! परित्रायस्व परित्रायस्व माम् ।

---

१ अम्ब सैरन्ध्रिके ! सुसंयमितस्त्वया एष केशपाशः । २ न खलु त्वमपि याज्ञसेनी यस्या अद्यापि न संयम्यते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुमारः—( ससम्भ्रमम् ) अयि कलिङ्गक! कथय कुतोऽयं प्रहारप्रादुर्भावः।

कलिङ्गकः—कुरुमहीपतेर्दुर्योधनात् ।

कुमारः—कथमिव ?।

कलिङ्गकः—कुर्वन्नर्वखुरक्षतोद्धतरजःपुञ्जेन गुञ्जामुख-
श्यामेनाम्बरमम्बुवाहनिवहेनेवावृतं सर्वतः।
भोगीन्द्रं ग्लपयन्निव प्रचलता दन्तिव्रजेन व्रज-
त्येष द्वेषिपटुर्विराटसुरभीरादाय दुर्योधनः ॥ १३ ॥

अपि च—

गोपानस्त्रव्रणितवपुषः प्रेक्ष्य बाष्पायिताक्ष्यो
हम्भारावैर्मुखरितमहाकुभ्ररन्ध्रं रुदत्यः।
ऊधोरोधादलसगतयोऽप्याशु भीत्या व्रजन्त्य-
स्ताम्यन्त्येताः कुरुपतिहृता मातरस्तर्णकानाम् ॥ १४ ॥

कुमारः—( सरोषम् ) आः! कुरुकुलापसदः सुयोधनो मयि प्रबद्धमत्सरे सति मत्स्याधिराजसौरभेयीरपहर्तुमिच्छति। अहो! धनुर्धनुः।

( प्रविश्य )

पुरुषः—तदेतद्धनुरादीयताम्।

( कुमारः ससम्भ्रमं धनुर्गृह्णाति )

अर्जुनः—( सानन्दमात्मगतम् ) हन्त! पल्लवितमथवा फलितमेव मेऽद्य मनोरथपादपेन, यदयं कालपाशाकृष्ट इव धृतराष्ट्रसूनुर्मम दृष्टिपथमवतरति।

( नेपथ्ये )

हंहो विराटराजपुत्राः! श्रृणुत शौण्डीराणां सुदुःश्रवमिदमस्मदीयं वचः।

ऊष्माणं दोष्मतां यः शमयति समरोन्निद्रनिस्त्रिंशधारा-
वाराम्भोवेन मोघीकृतसिततुरगप्रौढचापप्रतापः।
सोऽहं कौरव्यसिंहः सदनमनडुहीवृन्दमाच्छिद्य यामि
भ्रूयुग्मं यः प्रवीरो घटयति कुटिलं सोऽस्तु शस्त्री पुरस्तात् ॥१५॥

अर्जुनः—( सरोषाट्टहासम् ) कुमार! श्रुतं मिथ्याभिमानिनः सुयोधनहतकस्य वचनविस्फूर्जितम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**कुमारः**—( सक्रोधमुच्चैःस्वरम् ) शृणु रे स्वप्रशंसापातकपङ्कानुलिप्त मिथ्यावलिप्त ! शृणु ।

रामेण स्वधृतिधृता कृतं यदग्रे
माहेयीहरणचणस्य हैहयस्य ।
तत्तेऽद्य प्रसभमहङ्कृतस्य सोऽहं
कौरव्याधम ! समरे करोमि रोषात् ॥ १६ ॥

( इति संरम्भं नाटयन् ) भो जयसेन ! सम्पादय सम्पादय साम्परायिकं स्यन्दनम् ।

कुरुपतिमभिमानिनं समीके सपदि विमर्द्य यथाऽद्य कङ्कपत्रैः ।
अहमिह पुनराहरामि कीर्त्तीरिव सुरभीरपहृत्य नीयमानाः ॥ १७ ॥

**जयसेनः**—यदादिशति कुमारः । ( इति निष्क्रान्तः )

**उत्तरा**—( सभयम् ) अम्ब सेरन्धिए ! दुद्धरकरितुरयरहसहस्ससंचलियसंनिवेसो एस कुरुनरवई । पभूदा य तस्स बलजलहिसेलसरिच्छा गंगेयदोणकिवकण्णप्पमुहा महारहिणो सुणीयंति । ता कहं केवलभुयजुयलसहायो मह भाया तेण समं विक्कमिस्सदि ।

**द्रौपदी**—( साकूतम् ) अयि *खत्तकुलकन्नगे ! मा बीहेहि । अवस्सं एस विजयी कुमारो विरोहिरुहिरप्पवाहेण निव्वाइस्सदि नियबंधुवग्गस्स दुस्सहं दुक्खपावयं ।

**कुमारः**—( उत्तरां प्रति ) वीरसहोदरे ! किमदृष्टपूर्वासि भ्रातृभुजपराक्रमाणां यदेवमुत्ताम्यसि । पश्य !

तमपि समरसीमन्येष भङ्क्तास्मि भीष्मं
भुवनविदितशक्तिर्यत्र तान्तः कृतान्तः ।
धनुरनुदितदर्पप्रातिभं कुम्भकेतु-
र्भजतु च भुजयोर्मे गौरवं गाहमानः ॥ १८ ॥

---

१ अम्ब सैरन्धिके ! दुर्धरकरितुरगरथसहस्रसञ्चलितनिवेश एष कुरुनरपतिः । प्रभूताश्च तस्य बलजलधिशैलसदृशा गाङ्गेयद्रोणकृपकर्णप्रमुखा महारथिनः श्रूयन्ते । तत्कथं केवलभुजयुगलसहायः मम भ्राता तेन समं विक्रमिष्यति । २ अयि क्षत्रकुलकन्यके ! मा विभीहि । अवश्यमेष विजयी कुमारो विरोधिरुधिरप्रवाहेण निर्वापयिष्यति निजबन्धुवर्गस्य दुस्सहं दुःखपावकम् । * B खत्तिय°

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अर्जुनः—( सरोषमात्मगतम् ) कथमयं गेहेनर्दी धनुर्ग्रहणमात्राहङ्कृतिर्गुरूनधिक्षिपति । पश्यतु समरमुखम्। ततोऽनुशयिष्यति स्वाभिमानजनिताय वीरविरोधारम्भाय । ( प्रकाशम् ) हंहो राजपुत्र ! कृतमिदानीमात्मगुणग्रहणेन । कोदण्डगुणस्यैव ग्रहणमुहूर्त्तो वर्तते तत्त्वरतां भवान् ।

कुमारः—रे परिजनाः ! किं न जानीथ यदमर्षणोऽयं जनः समरसमारम्भे कालक्षेपस्य । तदानीयतां समरसामग्री ।

अर्जुनः—कलिङ्गक ! पुनरनुगम्यतामकुतोभयैर्भवद्भिः सुरभिसञ्चारपूतः पापीयसस्तस्य सेनासञ्चारः ।

यतः—

कुप्यत्कालभ्रुकुटिकुटिलं धन्व धुन्वन्नखर्वैः
कुर्वन्मौर्वीध्वनिभिरभितो दिग्गजान् भीतिभाजः ।
विश्वं शत्रोर्बलमलघुना मन्युना सञ्जिहीर्षन्नायात्येष त्रिपुररिपुवद्दुर्निवारः कुमारः ॥ १९ ॥

कलिङ्गकः—भद्र ! भवत्वेवम् ।

( इति निष्क्रान्तः )

( प्रविश्य रथाधिरूढः पुरुषः )

पुरुषः—कुमार ! स एष सिंहावतंसितकेतुदण्डः परदण्डाक्रमणोचितपरिस्यन्दः स्यन्दनः ।

उत्तरः—( दृष्ट्वा सचिन्तम् ) बृहन्नट ! रथानुरूपस्य सारथेरभावादसम्पूर्णसम्भारमिव स्वपराक्रममवगच्छामि ।

अर्जुनः—( स्वगतम् ) कथमसौ सम्परायगमनान्तरायबीजमिवोद्भावयति ? । भवत्वेवम् । ( प्रकाशम् ) नैतावत्यर्थे कदर्थनीयमात्मनो मनः कुमारेण । कुशलोऽस्मि सारथ्ये ।

तथाहि—

चक्रे यस्मिन्नह्नि वह्नेरभीष्टं तेन प्लुष्टे खाण्डवे पाण्डवेन ।
तस्मिन्नस्मि स्थापितः सारथित्वे वैशारद्यान्मातलिर्वज्रिणेव ॥ २० ॥

---

१ B रणमुखं २ B सारथित्वं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उत्तरः—तर्हि सिद्धं नः समीहितम्। तदेहि रथमारोहावः।
( इत्युभौ नाट्येन तथा कुरुतः )

उत्तरः—जयसेन ! गत्वाभिधीयतां नगरनिवासिभ्यो न भेतव्यमिति।

जयसेनः—आदेशः प्रमाणम्।

( इति निष्क्रान्तः )

उत्तरा—( द्रौपदीं प्रति ) अंबे[1] सेरंधिए ! पत्थिदो दाव कुमारो देवीए सुदेण्णाए निवेदीयदि।

( उभे निष्क्रान्ते )

अर्जुनः—( प्रग्रहान्सङ्कृष्य ) अयमहं वाहानुत्साहयामि। ( इति तथा करोति )

कुमारः—( विलोक्य ) कथमियं पुरपरिसरभूमिर्वाजिवेगतो व्यतिक्रम्यमाणापि नास्माभिरभिज्ञाता ?। ( पुनरन्यतः कर्णं दत्वा ) बृहन्नट ! कोऽयमाक्रन्दः स्यन्दननिनादं मन्दयन्निव दिवःपृथिव्योरन्तरालमालम्बते ? ।

अर्जुनः—( सम्यगुपलभ्य ) आयुष्मन् ! मातृवियोगविधुराणां तर्णकानामेष कर्णावस्कन्दी नेदीयानारावः प्रसरति।

उत्तरः—अतिदुःश्रवः शकृत्करीणामक्षीणकरुणरसप्रसरोऽयं परिदेविलध्वनिस्तत्त्वरयस्व तुरङ्गमान्।

( अर्जुनस्तथा करोति )

उत्तरः—( प्रभूतमन्तरं गत्वा ) बृहन्नट ! कथय कियति दूरे अद्यापि सा कुरुवरूथिनी।

अर्जुनः—ननु प्राप्तामेव तामेतां पश्यतु कुमारः।

चञ्चत्काञ्चनकेतुकान्तिभिरभिव्यक्तोदरं दृश्यते
रोदःकन्दररोधि भूधरकुलश्यामं चमूनां रजः।
किञ्चायं चकितैरिवाद्रिविवरैः प्रत्युच्यमानस्वनो
निस्वानप्रभवस्तव श्रवणयोः सीमानमाक्रामति ॥ २१ ॥

उत्तरः—( समन्तात्सेनामवलोक्य[2] ) बृहन्नट ! ते एते कुरुनरेन्द्रयोद्धारः[3] सर्वेऽपि

---

१ अम्ब ! सैरन्ध्रिके ! प्रस्थितस्तावत्कुमारः तद्देव्यै सुदेष्णायै निवेद्यते। २ B समन्तादवलोक्य ३ B कुरुयोद्धारः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सदृशकाञ्चनसन्नाहाः साधारणप्रहरणपरिग्राहिणः समानाभिमानतया च परस्परमपि स्पर्द्धमाना इव दृश्यन्ते । तददृष्टपूर्वेषु नामीषु मे प्रत्यभिज्ञानम् । भवान्पुनश्चिरपरिचितपाण्डुपुत्रत्वादवबुध्यते । तदवगमयतु मामेतान् । ( पुनरन्यतो दृष्ट्वा ) भो भगवान् ! क एष पुरुषव्याघ्रो वैयाघ्रेण रथेन सञ्चरमाणः सेनाया दक्षिणपार्श्वे लक्ष्यते ? ।

अर्जुनः—( निपुणं निरूप्य प्रत्यभिज्ञाय च ) कुमार !

सुवर्णवेदीविदितध्वजाग्रो जाग्रत्पताकाञ्चलचुम्बिताभ्रः ।
शुभ्रांशुशुभ्रांशुकसम्भृतश्रीः शारद्वतश्चापविशारदोऽयम् ॥ २२ ॥

उत्तरः—स एष कृपाचार्यो यः किल कुरूणां कार्मुकारोपणे प्रथमोपाध्याय इति श्रूयते ।

अर्जुनः—अथ किम् ? ।

उत्तरः—वामतः कोऽयं कलभनिभाकारो हिरण्मयेन धनुषा बन्धुरितध्वजाग्रो दृश्यते ? ।

अर्जुनः—मत्स्यराजयुवराज ! श्रूयताम् । अयम् ,

देवेन प्रथमं पिनाकधनुषा यत्नेन या निर्ममे
किञ्चिज्ज्ञैरिव[1] राघवप्रभृतिभिर्यत्राभियोगः कृतः ।
तस्यामेव विशेषवान्पितुरपि ख्यातप्रभावाद्धनु-
र्विद्यायामनवद्यविक्रमपदं द्रौणिः प्रवीणो रणे ॥ २३ ॥

उत्तरः—यः खलु सर्वदिव्यास्त्रवेदिनामादिमोऽश्वत्थामेति नाम समुद्वहति ।

अर्जुनः—अथ किम् ? ।

उत्तरः—( पुनरग्रतो वीक्ष्य ) बृहन्नट ! नियतमसौ महीयसि सैन्यसागरे चामीकरोपचितनिचोलकरोचिरञ्जितशरीरतया वडवाग्निरिव प्रदीप्यमानः[2] सुरसरित्सीकरप्रकरचारुचामरान्तरालवर्त्ती कुरुचक्रवर्त्ती दुर्योधनः योऽस्मज्जनकसभाभावितायां वीरचर्यायामिति सम्भाव्यते,

---

१ B किञ्च ज्ञैरपि २ B दीप्यमानः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तेजोभिर्जगदुत्तरैः परिभवं कुर्वन्निवाहर्पतेः
श्वेतेनातपवारणेन किरणानिन्दोश्च निन्दन्निव ।
उच्चैःकाञ्चनकेतनाग्रनिहितस्तम्बेरमस्तम्भित-
स्वर्मातङ्गमदो न दोःपरिमलं कस्याप्यसौ मृष्यति ॥ २४ ॥

अर्जुनः—किमुच्यते मानधनानामेको धुरीणः खल्वसौ धृतराष्ट्रनन्दनः ।

उत्तरः—( सुदूरमवलोकयन् ) अयं च कः सकलसैनिकाग्रगामी नरशरभः सरभसं पश्चादवलोकमानः प्रतिष्ठते ? ।

अर्जुनः—( सम्यग् निरूप्य ) कुमार ! सोऽयं कालपृष्ठधन्वा दुर्योधनस्य प्रियमित्रं सूतसूनुः तवापि कर्णे इति भुजचण्डिमडिण्डिमेन कर्णपथमवतीर्णो भविष्यति । पश्य !

अयमयतिनिदानं दानधर्मस्य भर्म
द्रवजगजवरत्राचित्रितेन ध्वजेन ।
शतमपि नृपतीनामप्रहृत्य प्रवीरो
विरमति न कथञ्चित्सङ्गरादङ्गराजः ॥ २५ ॥

उत्तरः—( पुरः पश्यन् ) कोऽयमनीकान्तरिक्षमध्यमध्यासीनो दिनाधिनाथवदवगाहमीहते तेजस्तरङ्गसङ्गमावदातः शातकुम्भकुम्भाङ्कितकेतनो मनोवेगैर्वाजिभिरुह्यमानरथो महारथपङ्क्तिपावन इव विभाव्यते ।

अर्जुनः—( दृष्ट्वा ) कुमार ! येन प्रसभं संरम्भवता भारद्वाजकुलकुलायविहङ्गमपुङ्गवेन सम्परायपराभूताद्द्रुपदमहीन्द्रात्तादृशं यशःपीयूषमाकृष्यते स्म ।

उत्तरः—नामतः श्रोतुमिच्छामि ।

अर्जुनः—( सबहुमानम् )

आलब्धप्रतिभूमिपालपशुषु स्पष्टं विधत्ते धनु-
ष्टङ्कारेण निमन्त्रणं पितृपतेः सङ्ग्रामसत्रेषु यः ।

---

१ B दूरमवलोक्य २ कर्ण इति ३ A चरित्रा० ४ B तत्तादृशं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

केषामेष निमेषतोऽपि न घनस्थामाभिमानद्रुमं
द्रोणः शोणतुरङ्गसङ्गतरथारूढोऽधिरोढुं क्षमः ॥ २६ ॥

उत्तरः—यस्य किल पार्थः प्रकृष्यति शिष्यसहस्रैरपि अधीयमानायामिष्वासवासनायाम् ।

अर्जुनः—( स्वगतम् ) नमो गुरुभ्यो यदनुग्रहेण शिष्यपरमाणोर्ममापि गणना तेषु धनुर्द्धरविद्याबन्धुरेषु बन्धुषु ।

उत्तरः—( पुनरङ्गुल्या दर्शयन् ) कोऽयमितः सितमरीचिमण्डलवलक्षरोचिषा मौलिनेवातपत्रेण विराजमानो मानैकनिकेतनं महारथः पुरो दृश्यते ? ।

अर्जुनः—( सरोमाञ्चम् ) वीरशब्दस्य प्रवृत्तिनिमित्तैश्चरिताद्भुतैरनुरञ्जितजयलक्ष्मीकः स एष पुराणपुरुषः ।

यः क्षत्राणां क्षतजसरिति स्नाति जाते स्म पित्रोः
शावाशौचे तमपि समिति व्यस्तवान् जामदग्न्यम् ।
तालेनोच्चैः कनकतनुना केतनाग्रस्थितेन
स्थामागारं स्फुरति पुरतः शन्तनोः पुत्र एषः ॥ २७ ॥

अपि च ।

शशधरशिरोमाल्यं कुल्या स्वयं यमजीजनत्
त्रिभुवनजयस्मेरो यस्य स्मरोऽपि पराङ्मुखः ।
नियतमयुतं वीराणां यस्तृणीकुरुते रणे
कुरुकुलगुरुः सोऽयं भीष्मः समृध्यति सूष्मणा ॥ २८ ॥

तदिह विहरतां कुमारः पौरुषोचितम् । ( इति रथं प्रेरयति )

उत्तरः—( दृष्ट्वा सभयरोमाञ्चम् ) बृहन्नट ! बृहन्नट ! मन्दय स्यन्दनवेगम् । विमृशामि किञ्चित् ।

अर्जुनः—( सोल्लासम् ) परिज्ञातमिदं मया ते विमर्शस्थानम् ।

उत्तरः—कथय किमिव ? ।

अर्जुनः—इह हि वीरवृन्दारकाणां वृन्दे नेदीयसि,

---

१ A प्रकृष्यते २ B धनुर्धरधुरन्धरेषु

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किं गाङ्गेयममेयबाहुविभवं द्रोणं किमुद्यद्गुणं
नादत्रासितशात्रवं किमथवा राधेयमत्युद्धतम् ।
दुष्टं वा धृतराष्ट्रसूनुमधुना पूर्वं मृधायाह्वये
सर्वान्वा सममित्यमर्षिमनसो मन्ये विमर्शस्तव ॥ २९ ॥

उत्तरः—नैतदन्यदेव तत् ।

अर्जुनः—कथ्यतां तर्हि ।

उत्तरः—बहवः प्रतीतपराक्रमबाहवो महारथास्ते इतो वर्तन्ते । अहं पुनरेकाकी । तदपसरणमेव श्रेयः ।

अर्जुनः—( कर्णौ पिधाय ) शान्तं पापं शान्तं पापम् । किमिदमक्षत्रिय इव व्याहरसि । पश्य ! पश्य !

द्वारं विमुक्तेः प्रतिबन्धमुक्तं कीर्त्यङ्गनानर्तनरङ्गभूमिम् ।
फलं यियासोरिह जीवितस्य कः सङ्गरं प्राप्य पराङ्मुखः स्यात् ॥३०॥

उत्तरः—नात्यन्तमपसरणं किन्तु त्रिगर्तानुच्छिद्य निवृत्तेषु तातपादेषु गृहीतमहाभटसहायो भूयोऽभियातिपताकिनीमभियोक्ष्यामहे ।

अर्जुनः—( विहस्य ) अयि वीरव्रतानभिज्ञ !

सम्परायेषु शूराणां शोभामात्रमनीकिनी ।
दोर्दण्डं चापदण्डं वा सहायं ते हि वृण्वते ॥ ३१ ॥

( इति वाजिभ्यः प्रतोदमुद्यच्छति )

उत्तरः—( सत्रासम् ) बृहन्नट ! सत्यं विराटकुलतन्तूच्छित्तये प्रवृत्तमिव पश्यामि त्वाम् । ( धनुर्मुक्त्वा प्रग्रहान्सङ्गृह्णाति ) ।

अर्जुनः—आः किमेवं विक्लवोऽसि? । विचारय स्थैर्यावस्थापितेन चेतसा ।

उत्पत्तिर्जगतीतलैकतिलके गोत्रे धरित्रीभुजा-
मूर्जापात्रमिदं वयः किमपरं कार्योत्सवोऽयं गवाम् ।
दिष्ट्या सङ्घटितस्तवैष सुकृतैर्योगस्तदुद्योगवा-
न्उर्वीं निर्विश निर्जितामसुधनक्रीतां दिवं वार्धुना ॥ ३२ ॥

१ A °मुद्यद्गुणान् २ B सद्गमथवा ३ B यातिपताकिनीमभियोक्ष्येऽहम् । ४ B वार्जय

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अपि च—दर्शयित्वा द्विषां पृष्ठमजातव्रणविग्रहः ।
दर्शयिष्यसि दाराणां वियातवदनं कथम् ॥ ३३ ॥

तन्मुञ्च रश्मीन् ।

उत्तरः—( तूष्णीको मूर्द्धानं धुनोति )

अर्जुनः—( स्वगतम् ) न तावदयं गौर्गेलिरिव वाक्प्रतोदैः कदर्थितोऽपि समरधुरामुद्वोढुमुत्सहते । तत्किं करोमि । ( साहङ्कारम् ) कृतमिदानीं कर्तव्यान्तरेण ।

वत्सानामहमुत्सवं विरचयाम्युच्चैर्मुहुः क्रन्दतां
निष्क्रीणामि विराटकुट्टिमसुखावस्थानमानीय गाः ।
द्रागेष द्रुपदात्मजानयनजैरम्भोभिरप्युद्भटः
क्रोधाग्निः कवलीकरोतु च कुरुक्रव्याणि हव्याशया ॥ ३४ ॥

( प्रकाशम् ) कुमार ! गृहाण प्रग्रहान् । उपनय मे चापं यथैतानवधूय धेनूरानयामि ।

उत्तरः—( सोच्छ्वासम् ) वरमेतदप्यस्तु । ( इति तथा करोति )

अर्जुनः—( धनुरादाय विलोक्य च स्वगतम् ) न खल्वियं अस्मदाकर्षणं क्षमते कार्मुकवल्ली । तस्मात्तदेव देवज्येष्ठेन परमेष्ठिना चिरपरिशीलितं चापमनुध्याय समीहितं साधयामि ।

( प्रकाशम् ) कुमार ! वीक्षसे सेनागमनमार्गमुत्तरेण निरन्तरपलाशोपशोभितं शमीपादपम् । तदिह प्रापय रथं यथा किमपि कार्यान्तरमनुतिष्ठामि ।

उत्तरः—( तथा कुर्वन्सविस्मयमात्मगतम् ) अहो ! वर्षधरवेषधारी पारीन्द्रपराक्रमः कोप्येष पुरुषविशेषो यदेतं दुस्तरमरातिसैन्यसागरं भुजद्वयेन तरीतुमुत्सहते ! ( पुरोऽवलोक्य प्रकाशम् ) बृहन्नट ! सेयं शमी । तद्विधीयतामभिमतम् । ( इति रथं स्थापयति )

अर्जुनः—( रथे उपविश्य ध्यानं नाटयति )

उत्तरः—( ऊर्ध्वमवलोक्य साश्चर्यम् ) बृहन्नट ! पश्य ! पश्य !

किमिदमुदरे भाति व्योम्नः सुधामधुरं मह-
स्तदनु च दिनारम्भोज्जृम्भत्प्रभाकरसन्निभम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अयमपि महानम्भोदानामिव श्रवणद्वय-
प्रणयमयते घोषः केषामशेषदिगन्तभाक् ॥ ३५ ॥

**अर्जुनः**—( नेत्रे समुन्मील्य ) कथमाजग्मिवानेवायमाञ्जनेयानुवर्त्तिनां भूतसङ्घातानां किलकिलारवैरापूरितरोदसीविवरः कार्तस्वरपुरस्कृतावयवो वलक्षवाजिभिरुह्यमानः स्यन्दनराजः ।

( ततः प्रविशति आकाशमार्गेण रथारूढो दिव्यपुरुषः )

**दिव्यपुरुषः**—कुमार किरीटिन् ! स एष प्लवगराजचक्रवर्त्तिना सनाथीकृतकेतनाग्रः साङ्ग्रामिको रथः । तदेतद्देवताभिनन्दितप्रभावं भवदिष्वासम् । अयं च सम्परायारम्भप्रणवायमानस्वानो देवदत्ताभिधानः शङ्खशेखरः । तदुपादीयतामसौ ।

**अर्जुनः**—( सहर्षं प्रणामपूर्वं धनुरादाय )

जयत्यजगवं धनुर्जयति धूर्जटेर्धन्विता
धनुर्धरधुरन्धरो जयति शार्ङ्गधन्वा हरिः ।
धनुश्च ऋजुरोहितं जयति सा च धानुष्कता
सुरारिसमराजिरप्रणयिनस्त्रिलोकीपतेः ॥ ३६ ॥

**पुरुषः**—( रथादुत्पतन् ) स्वस्ति भवते भीमानुजाय । ( इत्यन्तर्धत्ते )

**उत्तरः**—( सचमत्कारमात्मगतम् ) अये ! स एवायमिन्द्रसूनुरर्जुनो यस्य किल सुभद्राहरणोन्मुद्रितानि कीर्त्तिगीतानि कुरुकुरङ्गलोचनानां रोमाञ्चकञ्चुकमामुञ्चन्ति । ( सानन्दमञ्जलिं बद्ध्वा प्रकाशम् ) कुमार धनञ्जय ! भूमिञ्जयोऽभिवादयते । ( इति पादयोः पतति )

**अर्जुनः**—( स्वगतम् ) कथं ! विज्ञातोऽस्मि विराटराजपुत्रेण ! । अथवा प्रस्तावस्तावदिदानीमात्मन आविष्कर्तुम्[1] । ( इति उत्तरमुत्थाप्य परिष्वजते )

**उत्तरः**—( सप्रश्रयम् ) अयि कुशली सपरिग्रहोऽपि महाराजः सुकृतात्मजः कमिदानीं देशमुपस्करोति सहानुजन्मभिः ।

**अर्जुनः**—( विहस्य )

युधिष्ठिरं विद्धि तमक्षदेविनं यमाविमौ वाजिषु गोषु यौ स्थितौ ।
वृकोदरः सूदवरः स यः प्रियापराभवेणाकृत कीचकव्ययम् ॥ ३७ ॥

---

१ B °मात्मानमाविष्कर्त्तुम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उत्तरः—मर्षणीयमज्ञातभाषितम् । ( इति पुनः पादयोः पतति )

अर्जुनः—( सादरं निवारयन् ) न कदाचिदज्ञाते क्षतिरस्ति । तदेहि दिव्यं रथमारोहावः । ( इति रथारोहणं नाटयतः )

उत्तरः—कः कोऽत्र भोः ? ।

( प्रविश्य )

पुरुषः—आदिशतु कुमारः ।

उत्तरः—जयसेन ! निवर्तय मदीयं स्यन्दनम् । ( इति रथमर्पयति )

( जयसेनो रथमादाय साश्चर्यमर्जुनमालोक्य निष्क्रान्तः )

अर्जुनः—( बाहू विलोक्य सोत्साहम् ) किमधुना वलयपरिग्रहेण ? । ( इति तान्युत्तारयति )

उत्तरः—( दृष्ट्वा सरोमाञ्चम् ) अहह !

धवलां वलयश्रेणीं त्वचमिव निर्मुञ्चदेतदाभाति ।
ज्याकिणकठोरमर्जुनभुजयुग्मं भुजगयुग्ममिव ॥ ३८ ॥

( इति रथमारुह्य अर्जुनं प्रति )

कुमार ! भारद्वाजाङ्गराजभीष्मप्रभृतिभिः पुरुषव्याघ्रैरतिभीषणा कुरुनरेश्वरसेनारण्यानी । तदप्रमद्वरेण सञ्चरणीयमिह कुमारेण ।

अर्जुनः—( स्मित्वा गाण्डीवगुणं परामृशन् ) वैराटेय ! दृश्यतां यदत्र विधास्ये ।

स्वस्ति स्वस्तटिनीसुताय गुरवेऽप्येष प्रणामाञ्जलिः
स्थाता चेत्समरे नरेश्वरपशुः सार्कं स कर्णादिकैः ।
तद्विक्रान्तपथातिथेरपचितिं कर्त्तास्मि तस्योत्तरां
नाराचैरचिरात्किरातपृतनानिर्वापणव्यापृतैः ॥ ३९ ॥

तदशङ्कितेन प्रेर्यन्तां तुरङ्गमाः ( इति शङ्खमुद्धमति )

उत्तरः—( वाहान्प्रेरयन्नग्रतो विलोक्य ) कुमार ! तवामुना बधिरीकृतत्रिभुवनेन शङ्खध्वनिना क्षुभित इवायं बलजलधिरवलोक्यते । इमावथ कुरुराजस्य जयमनोरथधौरेयौ भीष्मद्रोणौ सैन्यपृष्ठावस्थितौ मुहुर्मुहुरावां विलोकयन्तौ पुरतो वर्तेते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( ततः प्रविशति भीष्मो द्रोणश्च )

द्रोणः—( विलोक्य सविस्मयम् ) शान्तनव !

धर्षयन्नखिलं विश्वं सप्ताश्व इव तेजसा।
पुरुषः कोऽयमायाति वपुष्मानिव विक्रमः ॥ ४० ॥

भीष्मः—( दूरादवलोक्य सवितर्कम् ) आचार्य ! निश्चितमेतेन संरम्भवता समरमुखाभिक्रमणेन वत्समर्जुनमेवागच्छामि। यतः—

कः सिंहेन विनानुगच्छति जवान्मत्तं गजानां व्रजं
को वा मारुतिमन्तरेण तमपामत्येतुमीष्टे पतिम्।
कश्चान्यस्त्रिदशाधिनाथतनयादेकः समीकाङ्गणे
वीराणां गणमुद्धतप्रहरणं संहर्तुमुत्कण्ठते ॥ ४१ ॥

अर्जुनः—वन्दनीयावेतौ प्रदक्षिणीकुर्वाणः सदाहङ्कुर्वाणेन सूतसुतेनानीयमानं सुयोधनानीकमनुप्राप्य रथं यावदनयोश्चिरदृष्टयोः शिष्टाचारसमयोचितं तीक्ष्णशरप्रणामेन दर्शयामि। ( इति भीष्मद्रोणयोः पादानुद्दिश्य शरद्वयं मुञ्चति )

उत्तरः—यदादिशति कुमारः।

( इति तौ प्रदक्षिणीकुर्वन्नर्जुनेन सह निष्क्रान्तः )

द्रोणः—( पादयोः पुरः शरमवलोक्य सगद्गदस्वरम् ) अयि देवनदीनन्दन ! दृश्यतामियमुचितज्ञता कुन्तीतनयस्य। यदीदृशेऽपि समरसंरम्भे न गुरुजनेषु विनयातिपातः। तद्विजयतां मे प्रियशिष्यः।

भीष्मः—( सखेदम् ) आचार्यविचार्यतामिदमस्मदीयमपि गुरुत्वानुरूपाचरितम्। यदेते वयं द्रविणकणादानलोभेन भुजिष्यायमाणाः सुदुस्सहदावव्यसनविनिर्गतस्य धर्मार्गलास्खलितशौर्यसिन्धुरप्रसरस्य वत्सबीभत्सोः पुरः शरासनमेव पारितोषिकीकृत्य वर्त्तामहे। सर्वथा धिगेतद्धनाय निबन्धनम्।

तथाहि—

सोढं सत्यकथाव्रतैः कुरुपतेः सावज्ञमालोकितं
कर्णस्याप्यभिशङ्कितैरनुमतं दुर्मन्त्रमन्त्रं वचः।

---

१ B adds before this

द्रोणः—नदीज ! लङ्केशवनारिकेतुर्नगाह्वयो नाम नगारिसूनुः।
एषोऽङ्गनावेशधरस्तरस्वी विजेष्यते सर्वकुरुप्रवीरान् ॥

This verse occurs with difference of reading in the second half in the thirtyninth Adhyâya of the Virâta Parva २ B मित्रं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दृष्टास्माभिरधोमुखैश्च विधुरा सा पाण्डवानां वधू-
र्वृद्धत्वेऽपि धनाशया वयममी तत्किं न यत्कारिताः ॥ ४२ ॥

द्रोणः—परिणतमिदानीमानन्दितशकुनेर्भवदवज्ञानविषपादपस्य कुरुकुलोपभोग्यं फलम् ।

( नेपथ्ये )

गन्धर्वेन्द्रमदैकदस्युभिरिषुव्रातैः प्रदीप्तां दिवं
यस्यासिञ्चदमन्दचन्दनतरुस्यन्दावदातं यशः ।
पार्थोऽहं कुरवः स वः स प्रबलतो ज्यारावराजाज्ञया
व्यासेधामि मृधार्थिनस्तदिह मे दत्त्वोत्तरं गम्यताम् ॥ ४३ ॥

भीष्मः—( श्रुत्वा ) भृशमभियुक्ता कुरुवरूथिनी धनञ्जयेन दुःखं गमिष्यति ।

( पुनस्तत्रैव )

भो ! भो ! कर्णप्रभृतयो दुर्योधनगृह्या[1] महारथाः ! प्रतिक्रियतां प्रतिक्रियतामसौ ।

विघटितघनधार्त्तराष्ट्रचक्रं समरसरस्तरसास्तपुण्डरीकम् ।
द्विरदवदवगाहते समन्तादतनुमदस्त्रिदशाधिराजसूनुः ॥ ४४ ॥

( प्रविश्य सम्भ्रान्त पुरुषः )

पुरुषः—तात ! त्रायस्व त्रायस्व । ( इति द्रोणरथस्याग्रे निपतति )

द्रोणः—( दृष्ट्वा ) वत्स ! कथं सारथिरसौ सुषेणः ! । ( ससम्भ्रमम् ) सुषेण ! कथय कथय कुशली वत्सो मे अश्वत्थामा ।

सुषेणः—तात ! शरीरमात्रेण ।

द्रोणः—( सखेदम् ) कथमिव ? ।

सुषेणः—(कथञ्चिदुत्थाय ) प्रचलति कौरवानीके लोकोत्तरपराक्रमेणैव सूचितमर्जुनोऽहमिति महारथानामात्मानमाविष्कुर्वन्सर्वसुरभिरक्षानियुक्ताभ्यामश्वत्थामशारद्वताभ्यामभ्येत्य सितवाहनः प्रतिहन्तुमारब्धः ।

---

१ B ग्राह्या
२

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भीष्मः—तदिदं कल्पान्तविप्लुतस्य पयोधेर्महीधराभ्यां प्रतिस्खलनम्। ततस्ततः।

सुषेणः—तदेतौ मातुलजामेयौ द्वावप्यजेयाश्वत्थामानौ विनयावच्छन्नमानोपपन्नमिदमिन्द्रसूनुनाऽभिभाषितौ।

पूज्यौ युवां द्विजपती व्रजतां तदाजे-
र्विद्यामदोऽथ बलवानिह वां नियुङ्क्ते।
तन्मर्षणीयमिदमद्य मृधोद्यतारि-
दोर्दर्पसम्पदपहारि शरापराद्धम्॥ ४५॥

द्रोणः—ततस्ततः।

सुषेणः—अथ तद्वचनावज्ञातरि तरसैव प्रहरमाणेऽश्वत्थामनि तथार्जुनेन विक्रान्तं यथा—

निरस्ते हस्ताग्राद्धनुषि सुषितायामिषुशतैः
पताकायां कायान्वहति विधुरे धुर्यनिवहे।
रथेऽवस्थाप्य स्वे तमथ मथितोरःस्थलरुजा
विसञ्ज्ञं वात्सल्यादहरत कृपस्त्वत्कपितृकम्॥ ४६॥

द्रोणः—शान्तनव! पर्याकुलं मे मनः। तद्वत्समेवानुसरिष्यामि। सुषेण! त्वयापि शेषं विज्ञप्य द्रुतमागन्तव्यम्।

(इति निष्क्रान्तः)

भीष्मः—सुषेण! ततस्ततः।

सुषेणः—देव! देवराजनन्दनदर्शनादेव शकुनिदुःशासनविकर्णप्रभृतिषु पलायमानेषु निवर्त्तितासु मत्स्यराजसौरभेयीषु भयङ्कराकारतया महाभैरवमपि भर्त्सयन्कृतान्तमप्यातङ्कयन्मृत्युमप्यतिलङ्घयन् अरेरे! तिष्ठ! तिष्ठ! इत्यादिसंरम्भाडम्बरैर्वचनैरम्बरमपि परिमिमानोऽर्जुनो भानोस्तनुजन्मानमभिजगाम। इति सति निष्क्रम्य समागतोऽस्मि।

(नेपथ्ये कलकलः)

सुषेणः—(श्रुत्वा सत्रासम्) देव! यथायमुद्धतो देवदत्तध्वनिस्तथा मन्ये पराजितश्चम्पाधिराजः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भीष्मः—कः सन्देहः। तथापि शृणु निश्चयमुपलभामहे।

(पुनस्तत्रैव)

रे मोहनिद्राकुम्भकर्ण कर्ण !

यत्त्वं देवादहिममहसः स्वस्य जन्माभिधत्से
धत्से मानं यदपि नृपतेरस्य तुल्यः सखेति।
यत्संहर्षं वहसि च मया चापविद्याभिमानी
तत्सर्वं ते क नु बत गतं नश्यतः सम्परायात् ॥ ४७ ॥

भीष्मः—(श्रुत्वा[1]) सत्यं पलायित एव सूतसूनुस्तत्साम्प्रतमेकाकिनः कुरुपतेः सविधवर्त्तिनो भविष्यामः। (इति निष्क्रान्तः)

सुषेणः—बाढं परिश्रान्तोऽस्मि। तद्विश्रम्य गमिष्यामि। (इत्युपविशति) (पुनः सचमत्कारं स्मृत्वा) अहह ! सकलानीके जलाभिव्यापिनस्तैलविन्दोरिव वन्दनीया काऽपि शक्तिः सुरेन्द्रनन्दनस्य।

तथाहि—

धृतराष्ट्रसुतैर्दृष्टः किरीटी विश्वतोमुखः।
एकोऽप्यनेकधा वल्गन्नात्मा नैयायिकैरिव ॥ ४८ ॥

हन्त ! श्लाघनीयस्तपस्तनयो यस्यैवंविधा मधुवैरिबाहव इव भ्रातरश्चत्वारः समिति पराक्रमन्ते।

(ततः प्रविशति रथारूढो युधिष्ठिरो द्रौपदी च)

द्रौपदी—[2]तदो तदो।

युधिष्ठिरः—[3]प्रिये ! ततस्त्रिगर्त्ताधिपतौ सुशर्मणि शराभिघातविघटितमर्माणं विराटमादाय जितकासिनि प्रतिनिवृत्ते मया भीमसेनः सानुक्रोशमित्यभिदधे। अयि वत्स ! सुदुस्सहोऽस्माभिरयमभिनवः कौलीनः कलङ्को यद्वृकोदरपरिरक्षितस्यापि विराटस्य पराजयः।

द्रौपदी—[4]सोहणं मंतिदं अज्जउत्तेण। तदो तदो।

युधिष्ठिरः—अथ मद्वचनालाननिर्मुक्तेन वीरकुञ्जरेण गम्भीरं गर्जता,

---

१ B श्रुत्वा २ ततस्ततः। ३ B reads अथ दक्षिणगोग्रहवार्त्ता च कथ्यते। अथ प्रिये ४ शोभनं मन्त्रितमार्यपुत्रेण।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गदावदालम्ब्य तमालमेक-
मनेकपानामयुतं निहत्य ।
तस्मात्त्रिगर्त्तेश्वरसैन्यजाला-
दुन्मोचितस्तेन स मत्स्यराजः ॥ ४९ ॥

द्रौपदी—साहु वीरावयंस भीमसेण ! साहु ।

सुषेणः—मन्दीभूतः समरसम्मर्दश्रमस्तद्गच्छामि। ( इति निष्क्रान्तः )

युधिष्ठिरः—देवि ! निवेदितं भीमस्य भुजविस्फूर्जितम्। तदेहि धनञ्जयस्यापि दर्शयामि। ( इति उभौ रथेन परिक्रामतः )

( नेपथ्ये ) वत्स वृकोदरानुज !

प्रत्याहृताः सुरभयो भुजसौरभं च
विक्रामताऽद्य भवता भुवने विकीर्णम् ।
तद्दुष्करां कुरुपतिप्रतिघातवाञ्छा-
मुत्सृज्य वत्स ! कुशली व्रज सम्परायात् ॥ ५० ॥

युधिष्ठिरः—( श्रुत्वा ) प्रिये ! शान्तनवस्यैव वात्सल्यावष्टम्भभावितं मधुरकषायपरिणाममिदं वचनम् ।

द्रौपदीः—अज्जउत्त ! कुमारधणंजयस्स पडिवयणाकण्णसद्धालुयं खु मह कण्णजुयलं ।

( पुनर्नेपथ्ये )

तात ! किमिदमनात्मसदृशमादिशन्ति तत्रभवन्तः ।

यतः—

वीरैरेभिः परिवृतरथः फाल्गुनेनामुनाद्य
प्रारब्धोऽसौ कुरुनरपतिः सम्प्रहारे प्रहर्तुम् ।
दूरादेनं सह सहचरैर्यद्यजित्वा निवर्ते
तद्वंशस्य प्रथमपुरुषो लज्जितस्त्वं मयैव ॥ ५१ ॥

---

१ साधु वीरावतंस भीमसेन ! साधु । २ B भुवनेऽवकीर्णं ३ आर्यपुत्र ! कुमारधनञ्जयस्य प्रतिवचनाकर्णनश्रद्धालुकं खलु मम कर्णयुगलम्।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

युधिष्ठिरः—साधु निरुत्तरीकृतोऽयं वत्सेन भगवान्सौरसैन्धवः। (पुनरग्रतो विलोक्य) कथमेष मेषस्थितादित्यबहुसहस्रतेजसा वत्सेन युयुत्समानः शान्तनवमन्तर्धाय सुयोधन इत एवाभिवर्तते ! ।

(ततः प्रविशतः संरम्भं नाटयन्तौ रथाधिरूढौ धृतधन्वानावर्जुनसुयोधनौ)

दुर्योधनः—आः पाप पाण्डवडिम्भ ! मयि दुर्योधने धनुर्धारिणि तातपादानधिक्षिपसि। पश्य रे !

गुरुरिति तव क्षोदे मन्दादरस्तदरालितां
भ्रुवमिव महासत्त्वेऽपि त्वं दधासि धिगुद्धतः।
मयि दिश दृशं यस्त्वां चापग्रहश्लथिलं किल
स्मरमिव हरो भस्मीकर्तुं प्रसह्य समुत्सहे ॥ ५२ ॥

द्रौपदी—(अपवार्य सरोषम्) हयांस कुरुपंसुल ! निंदणीयंपि अत्ताणयमेवं वन्नेसि।

अर्जुनः—(सक्रोधम्) रे हतक सांयुगीनम्मन्य धार्तराष्ट्राधम ! प्रासङ्गिकमपरं ननु त्वामेव दिदृक्षते पार्थनेपथ्यधारी दारुणोऽयं दैवदुर्विपाकः।

अपरं च—

अस्मासु काननिवासिषु लज्जयैव न्यञ्चन्मुखैरिषुधिगर्भगृहे स्थितं यैः।
तेऽमी शराश्चिरसमृद्धिपरा भवाग्नेर्दाहज्वरं त्वदसृजा विसृजन्तु सद्यः॥५३॥

दुर्योधनः—रे वाक्शूर ! पश्य इदानीं दुर्योधनस्य प्रहरणप्रावीण्यम्।

(इति बाणं धनुषि सन्धत्ते)

द्रौपदी—(दृष्ट्वा साद्भुतम्) अज्जउत्त ! पिच्छ ! पिच्छ ! जच्चकंचणरसरंजियं भुवणाभोयं कुणंतो वियडतडिक्कडप्पदुप्पिच्छदंसणो एस हुयासणो पसरंतमनुज्जेव कुदोवि संघडिदेहि घणसहस्सेहि उवसमीयदि।

युधिष्ठिरः—(सम्यङ्निरूप्य) देवि ! तदेव दुर्योधनस्य प्रहितमाग्नेयास्त्रं वत्सो वासविर्वारुणास्त्रेण प्रतिरुणद्धि।

---

१ B गुरुरपि २ B ग्रहिलं ३ हताश कुरुपांसुल ! निन्दनीयमप्यात्मानमेवं वर्णयसि। ४ B अत्ताणमेवं मन्नेसि ५ आर्यपुत्र ! पश्य! पश्य! जात्यकाञ्चनरसरञ्जितं भुवनाभोगं कुर्वन् विकटतडित्कटप्रदुःप्रेक्ष्यदर्शन एष हुताशनः प्रसरन्तमन्वेव कुतोऽपि सङ्घटितैः घनसहस्रैरुपशाम्यते। ६ B तेनैव प्रहितं

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुर्योधनः—रे पाण्डवडिम्भफेरण्ड ! कौरवकेसरिणं दुर्योधनमेवमाक्रमितुमिच्छसि । तत्सहस्वेदानीम् ( इति पुनर्बाणं सन्धत्ते )

अर्जुनः—( सरोषप्रकर्षम् ) अरे कद्वद ! नियन्त्रितोऽस्मि गुरुवचसा । व्याहर स्वैरं तत् ।

तथाहि—

पतगपतिरिव त्वां जिह्मगं च द्विजिह्वं
सपदि समहरिष्यद् द्रोणशिष्यः स एषः ।
यदि न सदसि कान्ताकेशहस्ते निरस्ते
बकरिपुरकरिष्यत्त्वद्विघातप्रतिज्ञाम् ॥ ५४ ॥

( इति शरं मुञ्चति )

( दुर्योधनः प्रहारवेदनां नाटयन्पतति )

सूतः—( सत्रासं दिशो विलोकयन्नुच्चैःस्वरम् )

द्रोणभीष्मकृपकर्णसौबलाः किं बलेन भवतां प्रधावत ।
पार्थबाणफणिदंशमूर्च्छितो नन्वसौ पतति कौरवेश्वरः ॥ ५५ ॥

( पुनर्वीक्ष्य ) कथं मम वचनमनादृत्यैव पलायन्ते ।

अर्जुनः—( दुर्योधनस्य रथमारुह्यावलोक्य च ) कथमद्यापि नास्य चेतना स्वभावाचेतनस्य ! ।

युधिष्ठिरः—( सहसोपसृत्य ससम्भ्रमम् ) कृतमिदानीं मोहमुपगतेऽस्त्रव्यापारेण । ननु निवेदितासि क्षत्रधर्माणाम् । ( इत्यर्जुनं हस्ते गृह्णाति )

अर्जुनः—( विलोक्य स्वगतम् ) कथमयमार्यो महाराजः सुकृतात्मजः ! । ( प्रकाशम् ) देव ! न कदाचिदस्मदीयानामहितमांसघस्मराणामपि हेतीनां कीचकान्तकाय सङ्कल्पितमेतमास्वादयितुमभिलाषः । तथापि मिथ्याभिमानिनो माहात्म्यचिह्नं शिरःकिरीटमपनेष्यामि ।

युधिष्ठिरः—भवत्वेवम् । ( इति हस्तं मुञ्चति )

द्रौपदी—( सहर्षमर्जुनं प्रति ) कुमार ! जुत्तमिणं ।

---

१ B रे कटुवचन ! २ कुमार ! युक्तमिदम् । यतः—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जदो—

अणमियसिराणमक्विवणवयणाणममुक्कसमरमग्गाणं ।
वीराणमाणभंगो सुदूसहो पाणभंगाओ ॥ ५६ ॥

अर्जुनः—( दुर्योधनस्य किरीटमपनीय काण्डमुखेन ध्वजदण्डे श्लोकमुत्कीर्य च युधिष्ठिरं प्रति ) देव ! अवधारय

छलद्यूते जेतुर्जतुमयमगारं रचयितु-
गंरं दातुः कान्ताकचसिचयहर्तुश्च सदसि ।
स्वयं गन्धर्वेन्द्रादधिगमितजीवस्य भवतः
शिरःस्थाने मानिन्मुकुटमपनिन्ये विजयिना ॥ ५७ ॥

( इति वाचयति )

उत्तरः—( सश्लाघम् ) सूक्तमिदमपराधप्रबन्धानुविद्धं कुमारधनञ्जयेन ।

युधिष्ठिरः—वत्स ! कृतं कर्तव्यम् । तदवतीर्यतामितः । ( इत्यर्जुनं रथादवतार्य सूतं प्रति ) अहो ! त्वरितमपसारय कुरुपतिस्यन्दनम् ।

( सूतः सभयं पश्चादवलोकयन्दुर्योधनेन सह निष्क्रान्तः )

उत्तरः—( युधिष्ठिरं प्रणम्य सहर्षौत्सुक्यम् ) देव ! समादिश मां यथा मत्स्यराजस्य सान्तःपुरपौरपरिवारस्यापि पार्थपराक्रममेवोद्घोषयामि ।

यथा—शून्ये राष्ट्रे प्रविष्टोऽयमाहर्तुं सुरभीरिमाः ।
कर्णं निष्कृत्य पार्थेन मुक्तः कौरवकुक्कुरः ॥ ५८ ॥

युधिष्ठिरः—यदभिमतं भवते । ( इति स्वरथमर्पयति )

( उत्तरः द्वितीयरथप्रग्रहान् अर्जुनस्यार्पयन्सर्वान्प्रणम्य निष्क्रान्तः )

अर्जुनः—( तथा कृत्वा ) देव अजातशत्रो ! याज्ञसेनीद्वितीयेन भवता समलङ्क्रियतामेष स्यन्दनवरः ( इत्युभौ नाट्येन तथा कुरुतः )

( आकाशे शङ्खध्वनिः पुष्पवृष्टिश्च । सर्वे ससम्भ्रममवलोकयन्ति )

(निरूप्य साश्चर्यम्) आर्य ! पश्य ! पश्य ! गगनगर्भोदयं भगवान्वृन्दारकचक्रवर्ती दिव्यविमानारूढः प्ररूढरोमाङ्कुराभिर्द्विनाभिरप्सरोभिः परिवृत इतो वर्तते ।

( ततः प्रविशत्याकाशलम्बमानविमानाश्रितः सहाप्सरोभिः वासवः )

---

अनमितशिरसामकृपणवचनानाममुक्तसमरमार्गाणाम् ।
वीराणामाज्ञाभङ्गः सुदुःसहः प्राणभङ्गात् ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

युधिष्ठिरः—( ऊर्ध्वमवलोकयन्नञ्जलिं बद्ध्वा ) भगवन् भुवनैकविभो गीर्वाणराज ! पाण्डोः प्रथममपत्यं युधिष्ठिरोऽभिवादये ।

( इति सर्वे प्रणमन्ति )

वासवः—वत्स विजयिन् ! महदाश्चर्यं दर्शितवानसि सम्प्रति सम्परायकुतूहलिनामस्माकम् ।

तथाहि—

दूरस्थे हसितं पुरोप्यचकिताकारं स्थिते विस्मितं
विज्ञाते क्षुभितं धनुर्गुणटणत्कारोद्धुते कम्पितम् ।
दृष्टस्थाम्नि पलायितं व्यवहिते भूयः समुज्जीवितं
भग्नोपेक्षिणि च स्तुतं त्वयि परैर्वीताहवे व्रीडितम् ॥ ५९ ॥

तदनेन जगदानन्ददायिना वीरचरितेन परितुष्टोऽस्मि ते । वृणीष्व वाञ्छितम् ।

अर्जुनः—( सविनयम् ) देव सकलदेवताधिदैवत शतक्रतो ! किमसम्भाव्यं भवत्प्रसादस्य । परम्—

तीर्थानामवगाहनैः सफलिता निन्याऽप्यरण्यस्थितिः
( युधिष्ठिरं दर्शयन् )
निर्व्यूढं च मनस्विनोऽस्य नृपतेः सत्त्वावगूढं वचः ।
निर्मथ्य प्रतिसैन्यसागरमिमं गावः समासादिताः
किञ्च त्वं प्रणतश्चराचरगुरुः किं प्रार्थयेऽतः परम् ॥ ६० ॥

वासवः—वत्स सात्त्विकशिरोमणे युधिष्ठिर ! वीरोत्तंस सव्यसाचिन् ! तथापीदमस्तु ।

अन्नैरस्तु निरन्तरा वसुमती तत्सम्पदं वारिदाः
काले कन्दलयन्तु भेकनिकरप्राणप्रदैरम्बुभिः ।
तत्सन्ताननिदानमग्निषु वषट्कुर्वन्तु हव्यं द्विजाः
तद्रक्षासु विचक्षणाः क्षितिभुजो राज्यं भजन्तु स्थिरम् ॥ ६१ ॥

( इति निष्क्रान्ताः सर्वे )

समाप्तोऽयं पार्थपराक्रमनामा व्यायोगः श्रीप्रह्लादननिर्मितश्च ।

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# INDEX TO THE VERSES IN THE PÂRTHAPARÂKRAMA


| | |
|---|---|
| अणमियसिराणम० | २३. ५६. |
| अन्नैरस्तु | २४. ६१. |
| अयमयति | १०. २५. |
| अस्मासु | २१. ५३. |
| आलब्धप्रतिभूमि० | १०. २६. |
| उत्पत्तिर्जगती० | १२. ३२. |
| ऊष्माणं | ५. १५. |
| कः सिंहेन | १६. ४१. |
| कल्पान्तभ्रान्त० | ४. १२. |
| किं गाङ्गेय० | १२. २९. |
| किमिदमुदरे | १३. ३५. |
| कुप्यत्काल० | ७. १९. |
| कुरुपतिमभि० | ६. १७. |
| कुर्वन्नर्वखुर० | ५. १३. |
| गदावदालाम्व्य | २०. ४९. |
| गन्धर्वेन्द्र० | १७. ४३. |
| गुरुरिति | २१. ५२. |
| गोत्रिणस्तृण० | ३. ९. |
| गोपानस्त्र० | ५. १४. |
| चक्रे यस्मिन्० | ७. २०. |
| चञ्चत्काञ्चन० | ८. २१. |
| छलद्यूते | २३. ५६. |
| जयत्यजगर्व | १४. ३६. |
| तद्वारत० | २. ६. |
| तमपि समर० | ६. १८. |
| तीर्थानामवगाहनैः | २४. ६०. |
| तेजोभिर्जगदु० | १०. २४. |
| दर्शयित्वा | १३. ३३. |
| दानोद्दण्ड० | १. ३. |
| दूरस्थे | २४. ५९. |
| देवेन | ९. २३. |
| देवः स वः | १. १. |
| द्रोणभीष्म० | २२. ५५. |
| द्वारं विमुक्तेः | १२. ३०. |
| धर्षयन्० | १६. ४०. |
| धवलां | १५. ३८. |
| धृतराष्ट्र० | १९. ४८. |
| निरस्ते | १८. ४६. |
| नीले मौलि० | १. २. |
| पतगपतिरिव | २२. ५४. |
| पर्यन्नेतु० | २. ७. |
| पाञ्चाली० | ३. १०. |
| पूज्यौ युवां | १८. ४५. |
| प्रत्याहृताः | २०. ५०. |
| प्रह्लादनस्य | २. ५. |
| मिथ्यारब्ध० | ३. ११. |
| यः क्षत्राणां | ११. २७. |
| यत्र क्षत्र० | २. ४. |
| यत्त्वं देवाद्० | १९. ४७. |
| यस्याद्यापि | ३. ८. |
| युधिष्ठिरं | १४. ३७. |
| रामेण | ६. १६. |
| वत्सानामह० | १३. ३४. |
| विघटित० | १७. ४४. |
| वीरैरेभिः | २०. ५१. |
| शशधर० | ११. २८. |
| शून्ये राष्ट्रे | २३. ५८. |
| सम्परायेषु | १२. ३१. |
| सुवर्णवेदी० | ९. २२. |
| सोढं सत्य० | १६. ४२. |
| स्वस्ति | १५. ३९. |


५

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# APPENDIX I.

## प्रह्लादनसूक्तयः[1]

### I

एकस्य तस्य मन्ये धन्यामभ्युन्नतिं जलधरस्य ।
विश्वं सशैलकाननमाननमालोकते यस्य* ॥
जलदः समुद्रसेवामाचरति समग्रभुवनभरणाय ।
कुरुते तामपि हतमतिरात्मम्भरिरनिशमौर्वाग्निः* ॥
गाता कोकिल एव ज्ञाता च रसाल एव नियतमिदम् ।
यः पञ्चममुद्गायति यस्यास्थिषु पुलकमुकुलानि* ॥
वहसि बलिभुजां कुलानि मौलौ यदि सहकार ! तदत्र को निषेद्धा ।
परमुदयति पल्लवाञ्चलेषु स्फुरदलिभिस्तव सौरभप्रसिद्धिः ॥
उत्तंसकौतुकरसेन विलासिनीनां लूनानि यस्य न नखैरपि पल्लवानि ।
उद्यानमण्डनतरो सहकार ! स त्वमङ्गारकारकरगोचरतां गतोऽसि ॥
यो दृष्टः स्फुटदस्थिसम्पुटमिषान्निर्यत्प्रवालाङ्कुरो
दैवात्स छिदलादिकक्रमवशादारूढशाखाशतः ।
स्निग्धं पल्लवितो घनं मुकुलितः स्फारच्छदं पुष्पितः
सोत्कर्षं फलितो भृशं विनमितः कोऽप्येष चूतद्रुमः ॥
मूर्त्तिर्नेत्ररसायनं यदि कुतश्छायेयमच्छेतरा
चक्रे सापि ततः कुतः फलभरः पीयूषगर्वाग्रहम् ।
एवं सर्वगुणान्वितं यदि भवानाम्रद्रुमं निर्ममे
तत्तत्र प्रगुणीकृतः कथमसौ दुर्दैवदावानलः ॥
महेशस्त्वां धत्ते शिरसि रसराजस्य जनिता
विशुद्धिस्त्वत्सङ्गात्कनकमयमेति त्रिभुवनम् ।
तनोति त्वत्सेवां ननु कनकवृक्ष ! त्वदपरः
परस्तत्को न स्याद्यदि न सुलभीभावमभजः* ॥

प्रह्लादस्य

---

1 Here are quoted verses attributed to प्रह्लाद & प्रह्लादन in Jahlaṇa's Sûktimuktâvali.

*Found also in शार्ङ्गधरपद्धति under प्रह्लादन

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

II

रविरविकलं श्लाघापात्रं किमत्र विचार्यते
 सकलजगतः सत्तामुज्जीवयन्ति यदंशवः ।
किमु पुनरितस्तापः पापः स केन विलुप्यतां
 अयमपि सुधारश्मिस्तस्मिन्न संरभते यदि ॥
स क्षारो जलधिः सरांसि वितरन्त्यभ्यागतेभ्यो मितं
 गृह्यन्ते सरितः श्रमेण परितोऽप्याधाय बन्धं बलात् ।
प्राप्यं कूपकतः कथश्चन किमप्यारोप्य कण्ठे पदं
 तत्त्वां त्यागिनमेकमेव भगवन्पर्जन्य ! मन्यामहे ॥
पारे परःशताः सन्ति महान्तो भव्यभूरुहाः ।
पारिजात ! त्वयैकेन नन्दनं नन्दनं पुनः ॥
रोहणाचल ! शैलेषु कस्तुलां तुलयेत्तव ।
यस्य पाषाणखण्डानि मण्डनं मेदिनीभृताम्* ॥
आलोकवन्तः सन्त्येव भूयांसो भास्करादयः ।
कलावानेव तु ग्रावद्रावकर्मणि कर्मठः* ॥
जडात्माऽपि भवत्युच्चैराश्रयन्महतां पदम् ।
गङ्गौघः शम्भुमूर्धानं प्राप विष्णुपदाश्रयात् ॥
शाखाभिर्वरिता दिशः कलयिता श्रीसंविभागोत्सवं
 तां रोलम्बकुटुम्बके प्रथयिता पान्थातिथेयीमसौ ।
इत्थं नाथमनोरथप्रथिमभिः सार्द्धं प्रवृद्धे सुधा
 हा दुर्वात ! किमाततान तदिदं बाले रसाले भवान् ! ॥
प्रियः प्रजानां दातैव न पुनर्द्रविणेश्वरः ।
 आगच्छन्वाञ्छ्यते लोकैर्वारिदो न तु वारिधिः ॥

प्रह्लादनस्य

*Quoted in शार्ङ्गधरपद्धति under प्रह्लादन.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## APPENDIX II.

### KAYADRAN INSCRIPTION

१– ॥ स्वस्ति श्रीसंवत् १२२०. जेष्ट सुदि
२–१५. सोमदिने सोमपर्व्वे महाराजाधि-
३–राज महामंडलेश्वरश्रीधारावर्षदेवे-
४–न सासनं प्रदतं श्रीकासेश्वरदेवीयभ-
५–ट्टारकदेवेश्वरस्य फुलहलीसत्क
६–मोचनीयः श्रीकुम्वरपाह्लणदेवेन ॥ वाह-
७–ल० केह्लणेन प्रदत्तं ॥ तलारपेथडेन जू-
८–णीदापं मोचनीय ॥ सोमपर्व्वे ॥ साक्षि वा-
९–हडसुत वजयरा । देजआसुत देदा साक्षि अ-
१०–त्र साक्षि महाजन ॥ जोन्यदत्तं स्वदत्तं वा ह-
११–रे भूमा नराधिप । प्रनष्टामपि खलेन ॥
१२–तस्य–ब्रह्मघातकं । मंगलं महाश्री ॥
१३–वासणग्रामवास्तव्य साल्हा खिसिग—
१४–प्रदत्तं नाय–क्षेत्रं मारिसह .... ....

### AJÂRI INSCRIPTION OF 1240

१ ॥ ओं ॥ सं १२४० वैशाख सुदि ३ सोमे अद्ये-
२–ह श्रीचन्द्रावल्यां ( त्यां ) श्रीधारावर्षदेवविजयराज्ये
३–श्रीपाल्हणदेवकुमार पटराणी श्रीसींगारदेवि
४–महं वांवडि आजाहरीग्रामवास्तव्य अइचाउश्री
५–अरहट रा. जगदेव महं० आसल तला० मो-
६–हण भांभीय माहिल सकल आभीव्यं कूरि
७–का भुक्तीः ॥ दीपयात्राभाव्यं समेइ पुली
८–कावली .... .... ....
९– .... .... गा ....
१०–रीध जु कोइ पुजारइ वारइ–वाइत.
११– .... .... .... ...

From Kotishvar (Mt. Abu,) inscription of Samvt. 1265

संवत् १२६५ वर्षे वैशाष शु १५ भौमे चौलुक्योद्धरणपरमभट्टारक-महाराजाधिराजश्रीमद्भीमदेवप्रवर्धमानविजयराज्ये श्रीकरणे महामुद्रामात्य-महं० ठाभूप्रभृतिसमस्तपंचकुले परिपन्थयति चंद्रावतीनाथमांडलिकासुरशंभु-श्रीधारावर्षदेवे एकातपत्रवाहकत्वेन भुवं पालयति षट्दर्शनअवलंबनस्तम्भ-सकलकलाकोविदकुमारगुरुश्रीप्रह्लादनदेवे यौवराज्ये सति इत्येवं काले ।

---

## APPENDIX III.

अर्बुदाचलाधिपतिना परमारपाल्हणेन रीरीप्रतिमा गालिता । तत्पित्तले-नाऽचलेनाऽचलेश्वरशण्ड: कारित: । तत्पातकेन गलितकुष्ठी जात: । गोत्रिभी राज्यं गृहीतम् । मरणभीत्या देशान्तरे निर्गतो भ्रमन् शीलधवलाचार्याणां मिलित: । जिनार्चागालनपातकं प्रोक्तम् । गुरुभि: प्रतिबोधो दत्त: । पश्चात्ता-पाद्गुरुपादे लगित्वा स्थित: । हे भगवन् ! पातकक्षयोपायं कथय प्रसद्य सद्यो दीने मयि । गुरुभिरुक्तम्–राजन् ! प्रासादप्रतिमादिपुण्यं कुरु कुरु । तदनु तेन स्वनाम्ना प्रल्हादनपुरं निवेशितम् । तत्र स्वकारितषोडशस्वर्णकपिशीर्षकरम्ये पाल्हणविहारे श्रीपार्श्वनाथस्य प्रतिमा कारिता श्रीचन्द्रप्रभादिप्रासादाश्च । त्रिसन्ध्यं पूजां करोति स्म । गवाक्षस्थ: साह्लादचेतसा श्रीपार्श्वनाथप्रतिमां निरन्तरं विलोकयति स्म । तत्पुण्यानुभावेन नष्ट: कुष्ठ: । यावज्जीवं जिनभ-क्तिं प्रतिपाल्य दिवं गत: । यथा जिनवन्दनेन वाञ्छितप्राप्ति:, तथा श्रीणां परि-पूर्णता । किं बहुना ? साक्षात्कल्पद्रुम एव जिन: ॥

उपदेशतरङ्गिणी pp. 198–199

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## "GAEKWAD'S ORIENTAL SERIES."

### ALREADY OUT.

| | | Rs. | a. | p. |
|---|---|---|---|---|
| | Kâvyamîmânsâ of Râjaśekhara ... ... ... | 2 | 0 | 0 |
| 2. | Naranârâyaṇânanda of Vastupâla ... ... ... | 1 | 4 | 0 |
| 3. | Tarkasaṅgraha of Ânanda-Jñâna ... ... ... | 2 | 0 | 0 |
| 4. | Pârthaparâkrama of Prahlâdanadeva ... ... ... | 0 | 6 | 0 |
| 5. | Râshtrauḍhavanśa Mahâkâvya of Rudrakavi ... ... | 1 | 8 | 0 |
| 6. | Liṅgânuśâsana of Vâmana with his own Vritti ... ... | 0 | 6 | 0 |

### WORKS IN THE PRESS.

1. Hammîramadamardana of Jayasiṇha Sûri
2. Prâchîna-Gûrjara-kâvya-saṅgraha
3. Panchmîkahâ of Dhanapâla (Apabhraṃśa.)
4. Kumârapâlapratibodha of Somaprabhâchârya
5. Mohaparâjaya of Yaśahpâla
6. Karpûracharitra and other five dramas of Vatsarâja.
7. Vasantavilâsa of Bâlachandra Sûri

### WORKS IN PREPARATION.

1. Tatvasaṅgraha of Śântarakshita with the commentary of Kamalaśîla
2. Paraśurâmakalpasûtra with Umânanda's Paddhati
3. A Descriptive Catalogue of all the 658 palm-leaf Mss. and important paper Mss. in the Bhandar at Pattan
4. A Descriptive Catalogue of the palm-leaf Mss. in the Bhandar at Jaisalmere
5. A Descriptive Catalogue of Mss. in the Central Library, Baroda.
6. Mahâvidyâ and Mahâvidyâvidambana with commentaries.
7. Mânavakalpasûtra with Jaradgava's Bhâshya

### WORKS UNDERTAKEN.

1. Tarangalolâ
2. Udayasundarî Kathâ of Soṭṭhala
3. Aparâjitapṛicchâ (Architecture).
4. Samarâṅgaṇa (Architecture) by King Bhoja.
5. Brahmasiddhi by Sureśvarâchârya.
6. Saṅgîtaratnâvalî by Somarâja Pratîhâra.
7. Abhilashitârthachintâmaṇi by the Châlukya King Someśvaradeva.
8. Gaṇakârikâ of Bhâsarvajña.
9. Lekhapanchâśikâ
10. Hiraṇyakeśîya Dharmasûtra.

**N. B.—Works in this series can be had at the Central Library, Baroda.**

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust